International Journal of Sanskrit Research 2021; 7(2): 147-150

International Journal of Sanskrit Research
अनन्ता

**ISSN: 2394-7519**
IJSR 2021; 7(2): 147-150
© 2021 IJSR
www.anantaajournal.com
Received: 22-01-2021
Accepted: 26-02-2021

**S Sitarama Rao**
Assistant Professor,
Department of Paraskara
Pourohitya, SV Vedic
University, Tirupati,
Andhra Pradesh, India

**Corresponding Author:**
**S Sitarama Rao**
Assistant Professor,
Department of Paraskara
Pourohitya, SV Vedic
University, Tirupati,
Andhra Pradesh, India

# पारस्करगृह्यसूत्रसमीक्षा

**S Sitarama Rao**

## प्रस्तावना

### I. उपोद्घातः

भारतीयसनातनधर्मरक्षणेवेदवेदाङ्गपुराणस्मृतीतिहासदर्शनसूत्रसाहित्यानांअत्यन्तमहत्वस्थानंवर्तते। तदध्ययन-प्रचार-प्रसारणेपारंपर्यधर्मरक्षणमपिभवति। वेदविहितकर्मानुष्ठानेनैवमनुजाः उत्तम फलानिमोक्षप्राप्तिं च प्राप्नुवन्ति ।

तादृशसंस्काराचरणेवर्णाश्रमव्यवस्थाप्रधानतयावर्तते।

वेदविहितकर्मानुष्ठानेषुकल्पशास्त्रस्यप्राधान्यंवरीवर्ति । यथा –

कल्पोवेदविहितानांकर्मणामानुपूर्वेण कल्पना श्रास्त्रम्। कल्पोक्तश्रौत– स्मार्तकर्माचरणेनैवमाणवकः संस्कृतोभूत्वाउत्तमाङ्गतिमवाप्नोति। श्रुत्यनुमितस्मृतिभोधकत्वात्संस्कारकर्मणामपिपरंपरयाश्रुतिमूलकानि ।

**प्रत्यक्षाहिश्रुतयःस्मार्तेषु च पुनः कर्तुसामान्यादनुमेयाःश्रुतयः** [1] ।

यद्यपि संस्कारकर्मणांश्रुतिमूलकत्वंनास्ति, श्रुत्यनुमितस्मृतिबोधकत्वात्संस्कार कर्मणामपिपरम्परयाश्रुति मूलकत्वमापद्यते। महर्षयः महता तपसा वेदाऽर्थज्ञानमवगम्यवेदाऽविरुद्धानिस्मृतीतिहासाश्रौत-गृह्यसूत्रादीनिरचयांबभूवुः। अतः वेदसारएवस्मृत्यादिनिष्ठविषयाः ।

### II. वेदाङ्गानि

अङ्ग्यन्तेज्ञायन्तेवेदार्थःअमीभिरितिअङ्गानि। वेदार्थज्ञानार्थंउपकारकारीत्यर्थः। तानिषट्, उपांगानिचषट् । यथा –

शिक्षा व्याकरणंछन्दोनिरुक्तंज्योतिषं तथा।
कल्पश्चेतिषडङ्गानिवेदस्याहुर्मनीषिणः [2] ॥

उपाङ्गानितु - १. प्रतिपदम् २. अनुपदम् ३. छन्दोभाषा ४. धर्मः ५. मीमांसा-न्यायः ६. तर्कः इत्युपांगानि [3] । एवमेववेदस्यपुरुषाकृतित्वेसतिअंगानांस्थानंकुत्रकुत्रभवतीत्यनेनश्लोकेन ज्ञायते।

छन्दःपादौतुवेदस्यहस्तौकल्पोऽथपठ्यते ।
ज्योतिषामयनंचक्षुःनिरुक्तंश्रोत्रमुच्यते ॥
शिक्षा घ्राणंतुवेदस्यमुखंव्याकरणंस्मृतम् ।
तस्मात्सांगमधीत्यैवब्रह्मलोकेमहीयते [4] ॥

इतिपाणिनीयशिक्षोक्तप्रकारेणवेदपुरुषस्यपादस्थानीयत्वेनपिङ्गळादिमहर्षिभिःप्रणीतंछन्दःशास्त्रम्,.हस्तस्थानीयत्वेनतत्तच्छाखाप्रवर्तकैर्महर्षिभिः.प्रणीतानिकल्पशास्त्राणिउक्तानि,.नेत्रस्थानीयत्वेनज्योतिश्शास्त्रं,.श्रोत्रस्थानीयत्वेननिरुक्तंप्रतिपादितम्.।.घ्राणस्थानीयत्वेन शिक्षाशास्त्रंउपदिष्टम्.।.शिक्षाशास्त्रप्रत्येकस्याअपिशाखायापृथग्रूपेण.वर्तते।.मुखस्थानीयत्वेनव्याकरणशास्त्रमुपदिष्टम्।.अङ्गसाहाय्यं विनाकेनाप्यङ्गिनाकिमपिकार्यंसुष्ठुकर्तुंनशक्यते।.अतएवमहर्षिणापाणिनिनासाङ्गाध्ययनेब्रह्मलोकप्राप्तिरूपंप्रयोजनंप्रतिपादितम्।.अनेनैवप्रकारेणअङ्गानांमहत्त्वंमुख्यत्वंचंज्ञायते।

## III. कल्पवैविध्यम्

**कल्पश्चतुर्विधः 1. श्रौतसूत्रम् 2. गृह्यसूत्रम् 3. धर्मसूत्रम् 4. शूल्बसूत्रमिति ।**

### 1.श्रौतसूत्रम् –

मन्त्र-ब्रह्मणोक्तश्रौतकर्मणांयथाक्रमनिर्देशनग्रन्थ इति ज्ञायते । कात्यायनश्रौतसूत्रेसप्तहविर्यज्ञानां, सप्तसोमसंस्थानां, वाजपेयराजसूय- अग्निचयन – अश्वमेथ– सर्वमेध-पुरुषमेध – पितृमेध – प्रवर्ग्यादीनांयागानांनिर्देशःउपलभ्यते।

### 2. गृह्यसूत्रम् –

गृहाय – गृहस्थाश्रममास्थाय, हितंगृह्यंतच्चतत्सूत्रंगृह्यसूत्रमितिनाम्नाव्यवह्रियते। शुक्लयजुर्वेदगृह्यसूत्रकर्ताश्रीपारस्कराचार्यः । कात्यायनाचार्याणामेवपारस्करइत्यपरं नाम (पारक्यंसूत्रजातंकरोतीतिपारस्करः) । एतैःऋग्वेद-सामवेद विषयेअनेकेप्रकरणग्रन्थाःप्रणीताःअस्मिन्गृह्येऔपासनाग्निसाध्याः संस्काराः, लौकिकाग्निसाध्याःसंस्काराश्चउपदिष्टाः ।

### 3. धर्मसूत्रम् –

त्रैवर्णिकानांआचारभेदाः एवं नियमाःयत्रउपदिश्यन्तेतदेवधर्मसूत्रम् । शुक्लयजुर्वेदेधर्मसूत्रंनोपलभ्यते । अतः याज्ञवल्यादिस्मृतिग्रन्थाःएवधर्मसूत्रेणस्वीक्रियन्ते ।

### 4. शुल्बसूत्रम् –

श्रौतयागादिषुयज्ञवेदिनिर्माणप्रकारोपदिष्टोग्रन्थः । अस्यापिप्रणेताश्रीकात्यायनाचार्यः ।गृह्यविचारः –

कर्मस्मार्तंविवाहाग्नौकुर्वीतप्रत्यहं गृही ।
दायकालहृतेवापिश्रौतंवैतानिकाग्निषु ॥

इति याज्ञवल्क्यस्मृत्युक्तदिशास्मार्तंवैश्वदेवादिकंकर्मविवाहाग्नौ (आवसथ्याग्नौ), श्रौताग्नौवागृहस्थःप्रतिदिनंकुर्यादितिज्ञायते । तथा च यस्मिन्नग्नौपाणिंगृह्णीयात् स गृह्यः [5] ।

इति सूत्रात्यस्मिन्नगौविधिनावधूं प्राप्य प्रतिदिनंवैश्वदेवादिकर्माणिआचार्यन्ते, स एवगृह्यः इति अवगम्यते ।

## IV. गृह्यसूत्राणांसामान्यपरिचयः

- **ऋग्वेदगृह्यसूत्राणि -** आश्वलायनगृह्यसूत्रम्, साख्यायनगृह्यसूत्रम्, कौषीतकीगृह्यसूत्रम्।
- **कृष्णयजुर्वेदे**–बोधायनगृह्यसूत्रम्, भारध्वाजगृह्यसूत्रम्, आपस्तम्बगृह्यसूत्रम्, हिरण्यकेशिगृह्यसूत्रम्,

वैखानसगृह्यसूत्रम्, अग्निवेश्यगृह्यसूत्रम्, वाराहगृह्यसूत्रम्, काठकगृह्यसूत्रम् ।

- **सामवेदे**–गोभिलगृह्यसूत्रम्, खादिरगृह्यसूत्रम्, जौमिनीयगृह्यसूत्रम्,कौथुमगृह्यसूत्रम् ।
- **अथर्वनेदे**–कौशिकगृह्यसूत्रम् ।

एतानिगृह्यसूत्रानिउपलख्यन्ते ।

## V. शुक्लयजुर्वेदीय गृह्यसूत्रम्

**पारस्करगृह्यसूत्रम्** - शुक्लयजुर्वेदस्यएकमात्रंगृह्यसूत्रमेतत् । अस्यैव कातीयगृह्यसूत्रमिति, वाजसनेयगृह्यसूत्रमितिकात्यायनगृह्यसूत्रमिति च नामान्तराणि सन्ति । अत्रगृह्यकर्मावश्यकमन्त्राणांसङ्ग्रहणंतत्तच्छाखामन्त्रभागतःकृतः । एवमेवनूतनमन्त्राः अपि उपदिष्टाः। अत्रकाण्डत्रयंवर्तते । काण्डत्रयेऽप्याहत्य51 कण्डिकाः सन्ति । परिशिष्टमपिवर्तते ।

**प्रथमकाण्डम्**

अस्यप्रथमकाण्डे19 कण्डिकाःसन्ति । प्रथमकण्डिकायांअग्निसंस्कारार्थसामान्यनियमाःउपदिष्टाः । द्वितीयकण्डिकायांगृह्याग्नेःआधानकालः, उत्पत्तिस्थानं च निरूपिताः । तृतीयकण्डिकायांमधुपर्कार्चनार्हाः के? एवं कदा? तद्विधानं च कथमितिसविस्तृतविवरणंलभ्यते । चतुर्थकण्डिकायांपाकयज्ञभेदाः, विवाहे कन्यायाःवस्त्रपरिधापनादिविषयाःकन्यादानविषयाश्चनिरूपिताः। पञ्चमकण्डिकायां होमे अघारावाज्यभागविषये,जयादिअभ्यातानहोमविषयेतन्मन्त्राणां विषयेचप्रस्तावना लभ्यते। षष्ठकण्डिकायांलाजहोमविधानंएवंसाङ्गुष्ठ पाणिग्रहणविधानंचवर्णितम्। सप्तमकण्डिकायां अश्मारोहणविधानंतन्मन्त्राः, अग्नेःप्रदक्षिणविधानंगाथागायनमित्यादिविषयाःनिरूपिताः । नवमकण्डिकायांऔपासनविधानं, पत्नी गर्भकामाचेत्विशेषमन्त्रोच्चारणेनपत्नीकर्तृकहोमविधानंवर्णितम् । दशमकण्डिकायांविवाहाग्निनयनसमये यदि यानविपर्यासेअन्यस्यांवाव्यापत्तौसतिप्रायश्चित्तहोमःनिरूपितः । एकादशकण्डिकायांचतुर्थीकर्मनिरूपणं, पत्नीसंस्करणविधानं च वर्णितम्। द्वादशकण्डिकायांदर्शपूर्णमासस्थालीपाकविधानंनिरूपितम्, त्रयोदशकण्डिकायांगर्भाधारणेऔषधोपायोवर्णितः । चतुर्दशकण्डिकायांपुंसवनंवर्णितम् ।पञ्चदशकण्डिकायांसीमन्तोन्नयनंवर्णितम्। षोडशकण्डिकायांजातकर्मसंस्कारः, सप्तदशकण्डिकायांनामकरण निष्क्रमणसंस्कारौवर्णितौ। अष्टादशकण्डिकायांपरदेशादागतस्यजनस्यपुत्रजनने इति कर्तव्यता निरूपिता । एकोनविंशतिकण्डिकायांअन्नप्राशनविधानंसुविस्तृतंवर्णितम् ।

**द्वितीयकाण्डम्** -

प्रथमकण्डिकायांचूडाकरणसंस्कारः एवं केशान्तसंस्कारश्चउपदिष्टः । द्वितीय तृतीय-चतुर्थ-पञ्चमकण्डिकासुउपनयनसंस्कारोनिरूपितः। षष्ठकण्डिकायांसमावर्तनं,ब्रह्मचारिव्रतनियमाःतत्कालनिरूपणञ्चदृश्यते । सप्तमकण्डिकायांस्नातकस्यनियमाः निरूपिताः । अष्टमकण्डिकायांत्रिरात्रव्रतानुष्ठानविधानंनिरूपितम् । नवमकण्डिकायां पञ्चमहायज्ञाः, दशमकण्डिकायांउपाकर्मसंस्कारः, एकादशकण्डिकायांअनध्ययनानि, द्वादशकण्डिकायामुत्सर्गविधिश्चनिरूपितः। कृषीवलानामुपयोगायत्रयोदशकण्डिकायांलाङ्गलयोजनमितिकर्मनिरूपितम्। चतुर्दशकण्डिकायांश्रावणीकर्म, पञ्चदशीकण्डिकायांइन्द्रयज्ञः, षोडशीकण्डिकायांपृषातककर्म, सप्तदशीकण्डिकायांसीतायज्ञश्चनिरूपितः।

**तृतीयकाण्डम्** -

प्रथमकण्डिकायामनाहिताग्नेःनवान्नप्राशनस्थालीपाकोवर्णितः।द्वितीयकण्डिकायामाग्रहायिणीकर्म, तृतीयकण्डिकायामष्टकाश्राद्धंचन्यरूपयत्। चतुर्थकण्डिकायांशालाकर्म (नूतनगृहप्रवेशविधानं) निरूपितम् ।पञ्चमकण्डिकायां मणिकावधानं, षष्ठकण्डिकायांशिरोरोगभेषजं,.सप्तमकण्डिकायांदुर्विनीतदासस्य वशीकरणविधानंचनिरूपितम्।अष्टमकण्डिकायांशूलगवोनामपाकयज्ञोनिरूपितः।नवमकण्डिकायांवृषोत्सर्गः, दशमकण्डिकायामन्त्येष्टिविशेषाः.निरूपिताः।.एकादशकण्डिकायामर्घ्यपशुनिरूपणंकृतम्।द्वादशकण्डिकायामवकीर्णिप्रायश्चित्तं,.त्रयोदशकण्डिकायांसभाप्रवेशनं,.चतुर्दशकण्डिकायांरथारोहणं, पञ्चदशकण्डिकायांहस्त्यारोहणं, अश्वारोहणं, उष्ट्रारोहणं, रासभारोहणमित्यादिविषयाःनिरूपिताः।

**परिशिष्टम्** –

अस्मिन्परिशिष्टभागेतटाकादि स्थापन, शौच – स्नान, ब्रह्मयज्ञ, नित्य तर्पण, एकोद्दिष्ट, सपिण्डीकरणआभ्युदयिकश्राद्धानि तृप्ति प्रकरणं अक्षय तृप्ति प्रकरणंकाम्यश्राद्धंभोजनसूत्रं च निरूपिताः ।

## VI. गृह्यसूत्रसंस्काराणां आवश्यकता -

संस्क्रियत आत्मा एभिरितिसंस्काराः इति व्युत्पत्याअविद्योपहतस्यात्मनोविशुद्धिजनकावैदिकक्रियाविशेषाःसंस्कारपदवाच्याभवितुमर्हन्ति । तेजातसंस्कारोमृतसंस्कारश्चेतिद्वैविध्यंभवति। संस्कारःद्विप्रकारकः 1. एकःवस्तूनिगुणाधानम् 2. अपरश्चवस्तुनःदोषापनयनम् इति । सर्वेषुगृह्यसंस्कारकर्मसुदोषापनयनं गुणवत्ता सम्पादनं च भवति । एवमेवशमंयातिबीजगर्भसमुद्भवम् [6] इति याज्ञवल्कोक्तवचनात् संस्कार कर्मभिःकृतैःएनःपापंशमयातीति । तथा च बैजिकपापान्यपमृज्यन्ते । कार्यःशरीरसंस्कारःपावनःप्रेत्यचेह च इति मनुवचनात्शरीरस्यपावनत्वमपिप्रवर्ततेतिगम्यते ।

स्वेस्वेगृह्ये यथा प्रोक्तास्तथासंस्कृतयोऽखिलाः । कर्तव्याभूतिकामेननान्यथासिद्धिमृच्छति [7] ॥

इति स्मृत्युक्तवचनाच्चगृह्यसूत्रोक्तसंस्काराः विधिवत् अनुतिष्ठेदितिज्ञायते।

## VII. उपसंहारः

जीवनरहस्यसम्बन्धपरिज्ञानस्यमानवःसततंप्रयत्नशीलोभूत्वाजीवनेसम्प्रवृत्तानांविघ्नानांदूरीकर्तुंप्रयततेमाणवकः । गृह्यसूत्रेउक्तकर्मणांअनुष्ठानद्वाराअस्माकंपूर्वजाःसर्वेऽपिश्रेयःअलभन्त, कर्मानुष्ठानेनैवपापापनोदकपुरस्सरंगुणाधानाय विशेष प्रयत्नःकृतवन्तःआसन् । तथा च सम्पदः, दीर्घायुः, शत्रुपराजयः, पुत्र – पौत्रादिसम्पत्तिः, सुवर्णादिवस्तुसम्पत्तिः, अन्नसमृद्धिः, बीजगर्भादि दोष निवृत्तिः, इत्यादि वाञ्छितफलानिप्राप्तुंगृह्यसूत्रेषुअनेकेउपायाःउक्तवन्तःमहर्षयः, एवं पौष्टिक कर्मणांआचरणद्वारापूर्णजीवनं, गौरवं, साफल्यसिद्धिः, सुन्दरजीवनविधानंप्राप्तुंअवकाशःभवति ।

## सन्दर्भ


1. पारस्करगृह्यसूत्रम्भाष्यम्. 1.1.1. कर्कः
2. संस्कारगणपतिःपृ 25
3. चरणव्यूहः 1.2
4. पा.शि.41,42
5. खादिरगृह्यसूत्रम् 1-5-1
6. याज्ञवल्क्यस्मृतिः1.13
7. आश्वलायन स्मृतिः.11.2